শ্রীৱিষ্ণুসহস্রনামস্তোত্রম্



Image credits- www.vishveshavani.com

ওঁ অথ শ্রীৱিষ্ণুসহস্রনামস্তোত্রম্ ।

শুক্লাম্বরধরং ৱিষ্ণুং শশিৱর্ণং চতুর্ভুজম্ ।
প্রসন্নৱদনং ধ্যাযেৎ সর্ৱৱিঘ্নোপশান্তযে ॥ ১॥

যস্য দ্বিরদৱক্ত্রাদ্যাঃ পারিষদ্যাঃ পরঃ শতম্ ।
ৱিঘ্নং নিঘ্নন্তি সততং ৱিষ্বক্সেনং তমাশ্রযে ॥ ২॥

ৱ্যাসং ৱসিষ্ঠনপ্তারং শক্তেঃ পৌত্রমকল্মষম্ ।
পরাশরাত্মজং ৱন্দে শুকতাতং তপোনিধিম্ ॥ ৩॥

শ্ৰীৱিষ্ণুসহস্ৰনামস্তোত্ৰম্

ৱ্যাসায ৱিষ্ণুৰূপায ৱ্যাসৰূপায ৱিষ্ণৱে ।

নমো ৱৈ ব্ৰহ্মনিধযে ৱাসিষ্ঠায নমো নমঃ ॥ ৪॥

অৱিকারায শুদ্ধায নিত্যায পরমাত্মনে ।

সদৈকৰূপৰূপায ৱিষ্ণৱে সৰ্ৱজিষ্ণৱে ॥ ৫॥

যস্য স্মরণমাত্ৰেণ জন্মসংসারবন্ধনাৎ ।

ৱিমুচ্যতে নমস্তস্মৈ ৱিষ্ণৱে প্ৰভৱিষ্ণৱে ॥ ৬॥

ওঁ নমো ৱিষ্ণৱে প্ৰভৱিষ্ণৱে ।

শ্ৰীৱৈশম্পাযন উৱাচ ---

শ্ৰুৎৱা ধৰ্মানশেষেণ পাৱনানি চ সৰ্ৱশঃ ।

যুধিষ্ঠিরঃ শান্তনৱং পুনরেৱাভ্যভাষত ॥ ৭॥

যুধিষ্ঠির উৱাচ ---

কিমেকং দৈৱতং লোকে কিং ৱাপ্যেকং পরাযণম্ ।

স্তুৱন্তঃ কং কমৰ্চন্তঃ প্ৰাপ্নুযুৰ্মানৱাঃ শুভম্ ॥ ৮॥

কো ধৰ্মঃ সৰ্ৱধৰ্মাণাং ভৱতঃ পরমো মতঃ ।

কিং জপন্মুচ্যতে জন্তুৰ্জন্মসংসারবন্ধনাৎ ॥ ৯॥

ভীষ্ম উৱাচ ---

জগৎপ্ৰভুং দেৱদেৱমনন্তং পুরুষোত্তমম্ ।

স্তুৱন্ নামসহস্ৰেণ পুরুষঃ সততোত্থিতঃ ॥ ১০॥

তমেৱ চাৰ্চযন্নিত্যং ভক্ত্যা পুরুষমৱ্যযম্ ।

ধ্যাযন্ স্তুৱন্ নমস্যংশ্চ যজমানস্তমেৱ চ ॥ ১১॥

অনাদিনিধনং ৱিষ্ণুং সৰ্ৱলোকমহেশ্ৱরম্ ।

লোকাধ্যক্ষং স্তুৱন্নিত্যং সৰ্ৱদুঃখাতিগো ভৱেৎ ॥ ১২॥

শ্ৰীৱিষ্ণুসহস্ৰনামস্তোত্ৰম্

ব্ৰহ্মণ্যং সৰ্ৱধৰ্মজ্ঞং লোকানাং কীৰ্তিৱৰ্ধনম্ ।
লোকনাথং মহদ্ভূতং সৰ্ৱভূতভৱোদ্ভৱম্ ॥ ১৩॥

এষ মে সৰ্ৱধৰ্মাণাং ধৰ্মোঽধিকতমো মতঃ ।
যদ্ভক্ত্যা পুণ্ডৰীকাক্ষং স্তৱৈৰৰ্চেন্নৰঃ সদা ॥ ১৪॥

পৰমং যো মহত্তেজঃ পৰমং যো মহত্তপঃ ।
পৰমং যো মহদ্ব্ৰহ্ম পৰমং যঃ পৰাযণম্ ॥ ১৫॥

পৱিত্ৰাণাং পৱিত্ৰং যো মঙ্গলানাং চ মঙ্গলম্ ।
দৈৱতং দৈৱতানাং চ ভূতানাং যোঽৱ্যযঃ পিতা ॥ ১৬॥

যতঃ সৰ্ৱাণি ভূতানি ভৱন্ত্যাদিযুগাগমে ।
যস্মিংশ্চ প্ৰলযং যান্তি পুনৰেৱ যুগক্ষযে ॥ ১৭॥

তস্য লোকপ্ৰধানস্য জগন্নাথস্য ভূপতে ।
ৱিষ্ণোৰ্নামসহস্ৰং মে শৃণু পাপভযাপহম্ ॥ ১৮॥

যানি নামানি গৌণানি ৱিখ্যাতানি মহাত্মনঃ ।
ঋষিভিঃ পৰিগীতানি তানি ৱক্ষ্যামি ভূতযে ॥ ১৯॥

ঋষিৰ্নাম্নাং সহস্ৰস্য ৱেদৱ্যাসো মহামুনিঃ ॥

ছন্দোঽনুষ্টুপ্ তথা দেৱো ভগৱান্ দেৱকীসুতঃ ॥ ২০॥

অমৃতাংশূদ্ভৱো বীজং শক্তিৰ্দেৱকিনন্দনঃ ।
ত্ৰিসামা হৃদযং তস্য শান্ত্যৰ্থে ৱিনিযোজ্যতে ॥ ২১॥

ৱিষ্ণুং জিষ্ণুং মহাৱিষ্ণুং প্ৰভৱিষ্ণুং মহেশ্বৰম্ ॥

অনেকৰূপ দৈত্যান্তং নমামি পুৰুষোত্তমং ॥ ২২ ॥

শ্ৰীৱেদৱ্যাস উৱাচ ---

ওঁ অস্য শ্ৰীৱিষ্ণোৰ্দিৱ্যসহস্ৰনামস্তোত্ৰমহামন্ত্ৰস্য ।

শ্ৰী ৱেদৱ্যাসো ভগৱান্ ঋষিঃ ।

অনুষ্টুপ্ ছন্দঃ ।

শ্ৰীমহাৱিষ্ণুঃ পৰমাত্মা শ্ৰীমন্নাৰাযণো দেৱতা ।

অমৃতাংশূদ্ভৱো ভানুৰিতি বীজম্ ।

দেৱকীনন্দনঃ স্ৰষ্টেতি শক্তিঃ ।

উদ্ভৱঃ ক্ষোভণো দেৱ ইতি পৰমো মন্ত্ৰঃ ।

শঙ্খভৃন্নন্দকী চক্ৰীতি কীলকম্ ।

শাৰ্ঙ্গধন্বা গদাধৰ ইত্যস্ত্ৰম্ ।

ৰথাঙ্গপাণিৰক্ষোভ্য ইতি নেত্ৰম্ ।

ত্ৰিসামা সামগঃ সামেতি কৱচম্ ।

আনন্দং পৰব্ৰহ্মেতি যোনিঃ ।

ঋতুঃ সুদৰ্শনঃ কাল ইতি দিগ্বন্ধঃ ॥

শ্ৰীৱিশ্বৰূপ ইতি ধ্যানম্ ।

শ্ৰীমহাৱিষ্ণুপ্ৰীত্যৰ্থে সহস্ৰনামস্তোত্ৰপাঠে ৱিনিযোগঃ ॥

অথ ধ্যানম্ ।

ক্ষীৰোদন্বৎপ্ৰদেশে শুচিমণিৱিলসৎসৈকতেৰ্মৌক্তিকানাং

মালাকॢপ্তাসনস্থঃ স্ফটিকমণিনিভৈৰ্মৌক্তিকৈৰ্মণ্ডিতাঙ্গঃ ।

শুভ্ৰৈৰভ্ৰৈৰদভ্ৰৈৰুপৰিৱিৰচিতৈৰ্মুক্তপীযূষ ৱৰ্ষৈঃ

আনন্দী নঃ পুনীযাদৰিনলিনগদা শঙ্খপাণিৰ্মুকুন্দঃ ॥ ১॥

ভূঃ পাদৌ যস্য নাভিৰ্ৱিযদসুৰনিলশ্চন্দ্ৰ সূৰ্যৌ চ নেত্ৰে

কৰ্ণাৱাশাঃ শিৰো দ্যৌৰ্মুখমপি দহনো যস্য ৱাস্তেযমব্ধিঃ ।

শ্ৰীৱিষ্ণুসহস্ৰনামস্তোত্ৰম্

অন্তঃস্থং যস্য ৱিশ্বং সুরনরখগগোভোগিগন্ধৰ্ৱদৈত্যৈঃ
চিত্ৰং রংরম্যতে তং ত্ৰিভুৱন ৱপুষং ৱিষ্ণুমীশং নমামি ॥ ২॥

ওঁ শান্তাকারং ভুজগশযনং পদ্মনাভং সুরেশং
ৱিশ্বাধারং গগনসদৃশং মেঘৱৰ্ণং শুভাঙ্গম্ ।
লক্ষ্মীকান্তং কমলনযনং যোগিভির্ধ্যানগম্যং ।
ৱন্দে ৱিষ্ণুং ভৱভযহরং সৰ্ৱলোকৈকনাথম্ ॥ ৩॥

মেঘশ্যামং পীতকৌশেযৱাসং
শ্ৰীৱৎসাঙ্কং কৌস্তুভোদ্ভাসিতাঙ্গম্ ।
পুণ্যোপেতং পুণ্ডরীকাযতাক্ষং
ৱিষ্ণুং ৱন্দে সৰ্ৱলোকৈকনাথম্ ॥ ৪॥

নমঃ সমস্তভূতানামাদিভূতায ভূভৃতে ।
অনেকরূপরূপায ৱিষ্ণৱে প্ৰভৱিষ্ণৱে ॥ ৫॥

সশঙ্খচক্ৰং সকিরীটকুণ্ডলং
সপীতৱস্ত্ৰং সরসীরুহেক্ষণম্ ।
সহারৱক্ষঃস্থলকৌস্তুভশ্ৰিযং
নমামি ৱিষ্ণুং শিরসা চতুৰ্ভুজম্ ॥ ৬॥

ছাযাযাং পারিজাতস্য হেমসিংহাসনোপরি
আসীনমম্বুদশ্যামমাযতাক্ষমলংকৃতম্ ।
চন্দ্ৰাননং চতুৰ্বাহুং শ্ৰীৱৎসাঙ্কিত ৱক্ষসং
রুক্মিণী সত্যভামাভ্যাং সহিতং কৃষ্ণমাশ্ৰযে ॥ ৭॥

স্তোত্ৰম্ ।

হরিঃ ওঁ ।

শ্ৰীৱিষ্ণুসহস্ৰনামস্তোত্ৰম্

ৱিশ্বং ৱিষ্ণুৰ্ৱষট্কাৰো ভূতভৱ্যভৱৎপ্ৰভুঃ ।
ভূতকৃদ্ভূতভৃদ্ভাৱো ভূতাত্মা ভূতভাৱনঃ ॥ ১॥

পূতাত্মা পৰমাত্মা চ মুক্তানাং পৰমা গতিঃ ।
অৱ্যযঃ পুৰুষঃ সাক্ষী ক্ষেত্ৰজ্ঞোঽক্ষৰ এৱ চ ॥ ২॥

যোগো যোগৱিদাং নেতা প্ৰধানপুৰুষেশ্বৰঃ ।
নাৰসিংহৱপুঃ শ্ৰীমান্ কেশৱঃ পুৰুষোত্তমঃ ॥ ৩॥

সৰ্ৱঃ শৰ্ৱঃ শিৱঃ স্থাণুৰ্ভূতাদিৰ্নিধিৰৱ্যযঃ ।
সম্ভৱো ভাৱনো ভৰ্তা প্ৰভৱঃ প্ৰভুৰীশ্বৰঃ ॥ ৪॥

স্বযম্ভূঃ শম্ভুৰাদিত্যঃ পুষ্কৰাক্ষো মহাস্বনঃ ।
অনাদিনিধনো ধাতা ৱিধাতা ধাতুৰুত্তমঃ ॥ ৫॥

অপ্ৰমেযো হৃষীকেশঃ পদ্মনাভোঽমৰপ্ৰভুঃ ।
ৱিশ্বকৰ্মা মনুস্ত্বষ্টা স্থৱিষ্ঠঃ স্থৱিৰো ধ্ৰুৱঃ ॥ ৬॥

অগ্ৰাহ্যঃ শাশ্বতঃ কৃষ্ণো লোহিতাক্ষঃ প্ৰতৰ্দনঃ ।
প্ৰভূতস্ত্ৰিককুব্ধাম পৱিত্ৰং মঙ্গলং পৰম্ ॥ ৭॥

ঈশানঃ প্ৰাণদঃ প্ৰাণো জ্যেষ্ঠঃ শ্ৰেষ্ঠঃ প্ৰজাপতিঃ ।
হিৰণ্যগৰ্ভো ভূগৰ্ভো মাধৱো মধুসূদনঃ ॥ ৮॥

ঈশ্বৰো ৱিক্ৰমী ধন্বী মেধাৱী ৱিক্ৰমঃ ক্ৰমঃ ।
অনুত্তমো দুৰাধৰ্ষঃ কৃতজ্ঞঃ কৃতিৰাত্মৱান্ ॥ ৯॥

সুৰেশঃ শৰণং শৰ্ম ৱিশ্বৰেতাঃ প্ৰজাভৱঃ ।
অহঃ সংৱৎসৰো ৱ্যালঃ প্ৰত্যযঃ সৰ্ৱদৰ্শনঃ ॥ ১০॥

শ্ৰীৱিষ্ণুসহস্ৰনামস্তোত্ৰম্

অজঃ সৰ্ৱেশ্বৰঃ সিদ্ধঃ সিদ্ধিঃ সৰ্ৱাদিৰচ্যুতঃ ।
ৱৃষাকপিৰমেযাত্মা সৰ্ৱযোগৱিনিঃসৃতঃ ॥ ১১॥

ৱসুৰ্ৱসুমনাঃ সত্যঃ সমাত্মাঽসম্মিতঃ সমঃ ।
অমোঘঃ পুণ্ডৰীকাক্ষো ৱৃষকৰ্মা ৱৃষাকৃতিঃ ॥ ১২॥

ৰুদ্ৰো বহুশিৰা বভ্ৰুৰ্ৱিশ্বযোনিঃ শুচিশ্ৰৱাঃ ।
অমৃতঃ শাশ্বতস্থাণুৰ্ৱৰাৰোহো মহাতপাঃ ॥ ১৩॥

সৰ্ৱগঃ সৰ্ৱৱিদ্ভানুৰ্ৱিষ্বক্সেনো জনাৰ্দনঃ ।
ৱেদো ৱেদৱিদৱ্যঙ্গো ৱেদাঙ্গো ৱেদৱিৎ কৱিঃ ॥ ১৪॥

লোকাধ্যক্ষঃ সুৰাধ্যক্ষো ধৰ্মাধ্যক্ষঃ কৃতাকৃতঃ ।
চতুৰাত্মা চতুৰ্ৱ্যূহশ্চতুৰ্দংষ্ট্ৰশ্চতুৰ্ভুজঃ ॥ ১৫॥

ভ্ৰাজিষ্ণুৰ্ভোজনং ভোক্তা সহিষ্ণুৰ্জগদাদিজঃ ।
অনঘো ৱিজযো জেতা ৱিশ্বযোনিঃ পুনৰ্ৱসুঃ ॥ ১৬॥

উপেন্দ্ৰো ৱামনঃ প্ৰাংশুৰমোঘঃ শুচিৰূৰ্জিতঃ ।
অতীন্দ্ৰঃ সঙ্গ্ৰহঃ সৰ্গো ধৃতাত্মা নিযমো যমঃ ॥ ১৭॥

ৱেদ্যো ৱৈদ্যঃ সদাযোগী ৱীৰহা মাধৱো মধুঃ ।
অতীন্দ্ৰিযো মহামাযো মহোৎসাহো মহাবলঃ ॥ ১৮॥

মহাবুদ্ধিৰ্মহাৱীৰ্যো মহাশক্তিৰ্মহাদ্যুতিঃ ।
অনিৰ্দেশ্যৱপুঃ শ্ৰীমানমেযাত্মা মহাদ্ৰিধৃক্ ॥ ১৯॥

মহেষ্বাসো মহীভৰ্তা শ্ৰীনিৱাসঃ সতাং গতিঃ ।
অনিৰুদ্ধঃ সুৰানন্দো গোৱিন্দো গোৱিদাং পতিঃ ॥ ২০॥

শ্ৰীৱিষ্ণুসহস্ৰনামস্তোত্ৰম্

মরীচির্দমনো হংসঃ সুপর্ণো ভুজগোত্তমঃ ।
হিরণ্যনাভঃ সুতপাঃ পদ্মনাভঃ প্রজাপতিঃ ॥ ২১॥

অমৃত্যুঃ সর্ৱদৃক্ সিংহঃ সন্ধাতা সন্ধিমান্ স্থিরঃ ।
অজো দুর্মর্ষণঃ শাস্তা ৱিশ্রুতাত্মা সুরারিহা ॥ ২২॥

গুরুর্গুরুতমো ধাম সত্যঃ সত্যপরাক্রমঃ ।
নিমিষোঽনিমিষঃ স্রগ্বী ৱাচস্পতিরুদারধীঃ ॥ ২৩॥

অগ্রণীর্গ্রামণীঃ শ্রীমান্ ন্যাযো নেতা সমীরণঃ ।
সহস্রমূর্ধা ৱিশ্বাত্মা সহস্রাক্ষঃ সহস্রপাৎ ॥ ২৪॥

আৱর্তনো নিৱৃত্তাত্মা সংৱৃতঃ সম্প্রমর্দনঃ ।
অহঃ সংৱর্তকো ৱহ্নিরনিলো ধরণীধরঃ ॥ ২৫॥

সুপ্রসাদঃ প্রসন্নাত্মা ৱিশ্বধৃগ্বিশ্বভুগ্বিভুঃ ।
সৎকর্তা সৎকৃতঃ সাধুর্জহ্নুর্নারাযণো নরঃ ॥ ২৬॥

অসঙ্খ্যেযোঽপ্রমেযাত্মা ৱিশিষ্টঃ শিষ্টকৃচ্ছুচিঃ ।
সিদ্ধার্থঃ সিদ্ধসঙ্কল্পঃ সিদ্ধিদঃ সিদ্ধিসাধনঃ ॥ ২৭॥

ৱৃষাহী ৱৃষভো ৱিষ্ণুর্ৱৃষপর্ৱা ৱৃষোদরঃ ।
ৱর্ধনো ৱর্ধমানশ্চ ৱিৱিক্তঃ শ্রুতিসাগরঃ ॥ ২৮॥

সুভুজো দুর্ধরো ৱাগ্মী মহেন্দ্রো ৱসুদো ৱসুঃ ।
নৈকরূপো বৃহদ্রূপঃ শিপিৱিষ্টঃ প্রকাশনঃ ॥ ২৯॥

ওজস্তেজোদ্যুতিধরঃ প্রকাশাত্মা প্রতাপনঃ ।
ঋদ্ধঃ স্পষ্টাক্ষরো মন্ত্রশ্চন্দ্রাংশুর্ভাস্করদ্যুতিঃ ॥ ৩০॥

শ্ৰীৱিষ্ণুসহস্ৰনামস্তোত্ৰম্

অমৃতাংশূদ্ভৱো ভানুঃ শশবিন্দুঃ সুরেশ্বরঃ ।
ঔষধং জগতঃ সেতুঃ সত্যধৰ্মপরাক্ৰমঃ ॥ ৩১॥

ভূতভৱ্যভৱন্নাথঃ পৱনঃ পাৱনোঽনলঃ ।
কামহা কামকৃৎকান্তঃ কামঃ কামপ্ৰদঃ প্ৰভুঃ ॥ ৩২॥

যুগাদিকৃদ্যুগাৱৰ্তো নৈকমাযো মহাশনঃ ।
অদৃশ্যো ৱ্যক্তরূপশ্চ সহস্ৰজিদনন্তজিৎ ॥ ৩৩॥

ইষ্টোঽৱিশিষ্টঃ শিষ্টেষ্টঃ শিখণ্ডী নহুষো ৱৃষঃ ।
ক্ৰোধহা ক্ৰোধকৃৎকর্তা ৱিশ্ববাহুৰ্মহীধরঃ ॥ ৩৪॥

অচ্যুতঃ প্ৰথিতঃ প্ৰাণঃ প্ৰাণদো ৱাসৱানুজঃ ।
অপাংনিধিরধিষ্ঠানমপ্ৰমত্তঃ প্ৰতিষ্ঠিতঃ ॥ ৩৫॥

স্কন্দঃ স্কন্দধরো ধুৰ্যো ৱরদো ৱাযুৱাহনঃ ।
ৱাসুদেৱো বৃহদ্ভানুরাদিদেৱঃ পুরন্দরঃ ॥ ৩৬॥

অশোকস্তারণস্তারঃ শূরঃ শৌরিৰ্জনেশ্বরঃ ।
অনুকূলঃ শতাৱৰ্তঃ পদ্মী পদ্মনিভেক্ষণঃ ॥ ৩৭॥

পদ্মনাভোঽরৱিন্দাক্ষঃ পদ্মগৰ্ভঃ শরীরভৃৎ ।
মহৰ্দ্ধিৰৃদ্ধো ৱৃদ্ধাত্মা মহাক্ষো গরুডধ্বজঃ ॥ ৩৮॥

অতুলঃ শরভো ভীমঃ সমযজ্ঞো হৱিৰ্হরিঃ ।
সৰ্ৱলক্ষণলক্ষণ্যো লক্ষ্মীৱান্ সমিতিঞ্জযঃ ॥ ৩৯॥

ৱিক্ষরো রোহিতো মাৰ্গো হেতুৰ্দামোদরঃ সহঃ ।
মহীধরো মহাভাগো ৱেগৱানমিতাশনঃ ॥ ৪০॥

শ্ৰীৱিষ্ণুসহস্ৰনামস্তোত্ৰম্

উদ্ভৱঃ ক্ষোভণো দেৱঃ শ্ৰীগৰ্ভঃ পৰমেশ্বৰঃ ।
কৰণং কাৰণং কৰ্তা ৱিকৰ্তা গহনো গুহঃ ॥ ৪১॥

ৱ্যৱসায়ো ৱ্যৱস্থানঃ সংস্থানঃ স্থানদো ধ্ৰুৱঃ ।
পৰৰ্দ্ধিঃ পৰমস্পষ্টস্তুষ্টঃ পুষ্টঃ শুভেক্ষণঃ ॥ ৪২॥

ৰামো ৱিৰামো ৱিৰজো মাৰ্গো নেয়ো নয়োঽনয়ঃ । or ৱিৰামো ৱিৰতো
ৱীৰঃ শক্তিমতাং শ্ৰেষ্ঠো ধৰ্মো ধৰ্মৱিদুত্তমঃ ॥ ৪৩॥

ৱৈকুণ্ঠঃ পুৰুষঃ প্ৰাণঃ প্ৰাণদঃ প্ৰণৱঃ পৃথুঃ ।
হিৰণ্যগৰ্ভঃ শত্ৰুঘ্নো ৱ্যাপ্তো ৱায়ুৰধোক্ষজঃ ॥ ৪৪॥

ঋতুঃ সুদৰ্শনঃ কালঃ পৰমেষ্ঠী পৰিগ্ৰহঃ ।
উগ্ৰঃ সংৱৎসৰো দক্ষো ৱিশ্ৰামো ৱিশ্বদক্ষিণঃ ॥ ৪৫॥

ৱিস্তাৰঃ স্থাৱৰস্থাণুঃ প্ৰমাণং বীজমৱ্যয়ম্ ।
অৰ্থোঽনৰ্থো মহাকোশো মহাভোগো মহাধনঃ ॥ ৪৬॥

অনিৰ্ৱিণ্ণঃ স্থৱিষ্ঠোঽভূৰ্ধৰ্ময়ূপো মহামখঃ ।
নক্ষত্ৰনেমিৰ্নক্ষত্ৰী ক্ষমঃ ক্ষামঃ সমীহনঃ ॥ ৪৭॥

যজ্ঞ ইজ্যো মহেজ্যশ্চ ক্ৰতুঃ সত্ৰং সতাং গতিঃ ।
সৰ্ৱদৰ্শী ৱিমুক্তাত্মা সৰ্ৱজ্ঞো জ্ঞানমুত্তমম্ ॥ ৪৮॥

সুৱ্ৰতঃ সুমুখঃ সূক্ষ্মঃ সুঘোষঃ সুখদঃ সুহৃৎ ।
মনোহৰো জিতক্ৰোধো ৱীৰবাহুৰ্ৱিদাৰণঃ ॥ ৪৯॥

স্বাপনঃ স্বৱশো ৱ্যাপী নৈকাত্মা নৈককৰ্মকৃৎ ।
ৱৎসৰো ৱৎসলো ৱৎসী ৰত্নগৰ্ভো ধনেশ্বৰঃ ॥ ৫০॥

শ্ৰীৱিষ্ণুসহস্রনামস্তোত্রম্

ধৰ্মগুব্ধৰ্মকৃদ্ধৰ্মী সদসৎক্ষরমক্ষরম্ ।

অৱিজ্ঞাতা সহস্রাংশুর্ৱিধাতা কৃতলক্ষণঃ ॥ ৫১॥

গভস্তিনেমিঃ সত্ত্বস্থঃ সিংহো ভূতমহেশ্বরঃ ।

আদিদেৱো মহাদেৱো দেৱেশো দেৱভৃদ্গুরুঃ ॥ ৫২॥

উত্তরো গোপতির্গোপ্তা জ্ঞানগম্যঃ পুরাতনঃ ।

শরীরভূতভৃদ্ভোক্তা কপীন্দ্রো ভূরিদক্ষিণঃ ॥ ৫৩॥

সোমপোঽমৃতপঃ সোমঃ পুরুজিৎপুরুসত্তমঃ ।

ৱিনযো জযঃ সত্যসন্ধো দাশাৰ্হঃ সাৎৱতাম্পতিঃ ॥ ৫৪॥ ৱিনিযোজ্যঃ

জীৱো ৱিনযিতা সাক্ষী মুকুন্দোঽমিতৱিক্রমঃ ।

অম্ভোনিধিরনন্তাত্মা মহোদধিশযোঽন্তকঃ ॥ ৫৫॥

অজো মহাৰ্হঃ স্বাভাৱ্যো জিতামিত্রঃ প্রমোদনঃ ।

আনন্দো নন্দনো নন্দঃ সত্যধৰ্মা ত্রিৱিক্রমঃ ॥ ৫৬॥

মহৰ্ষিঃ কপিলাচাৰ্যঃ কৃতজ্ঞো মেদিনীপতিঃ ।

ত্রিপদস্ত্রিদশাধ্যক্ষো মহাশৃঙ্গঃ কৃতান্তকৃৎ ॥ ৫৭॥

মহাৱরাহো গোৱিন্দঃ সুষেণঃ কনকাঙ্গদী ।

গুহ্যো গভীরো গহনো গুপ্তশ্চক্রগদাধরঃ ॥ ৫৮॥

ৱেধাঃ স্বাঙ্গোঽজিতঃ কৃষ্ণো দৃঢঃ সঙ্কৰ্ষণোঽচ্যুতঃ ।

ৱরুণো ৱারুণো ৱৃক্ষঃ পুষ্করাক্ষো মহামনাঃ ॥ ৫৯॥

ভগৱান্ ভগহাঽঽনন্দী ৱনমালী হলাযুধঃ ।

আদিত্যো জ্যোতিরাদিত্যঃ সহিষ্ণুৰ্গতিসত্তমঃ ॥ ৬০॥

সুধন্বা খণ্ডপরশুর্দারুণো দ্ৰৱিণপ্ৰদঃ ।
দিৱস্পৃক্ সৰ্ৱদৃগ্ব্যাসো ৱাচস্পতিরযোনিজঃ ॥ ৬১॥
ত্ৰিসামা সামগঃ সাম নিৰ্ৱাণং ভেষজং ভিষক্ ।
সংন্যাসকৃচ্ছমঃ শান্তো নিষ্ঠা শান্তিঃ পরাযণম্ ॥ ৬২॥

শুভাঙ্গঃ শান্তিদঃ স্ৰষ্টা কুমুদঃ কুৱলেশযঃ ।
গোহিতো গোপতির্গোপ্তা ৱৃষভাক্ষো ৱৃষপ্ৰিযঃ ॥ ৬৩॥

অনিৱৰ্তী নিৱৃত্তাত্মা সঙ্ক্ষেপ্তা ক্ষেমকৃচ্ছিৱঃ ।
শ্ৰীৱৎসৱক্ষাঃ শ্ৰীৱাসঃ শ্ৰীপতিঃ শ্ৰীমতাংৱরঃ ॥ ৬৪॥

শ্ৰীদঃ শ্ৰীশঃ শ্ৰীনিৱাসঃ শ্ৰীনিধিঃ শ্ৰীৱিভাৱনঃ ।
শ্ৰীধরঃ শ্ৰীকরঃ শ্ৰেযঃ শ্ৰীমাঁল্লোকত্ৰযাশ্ৰযঃ ॥ ৬৫॥

স্বক্ষঃ স্বঙ্গঃ শতানন্দো নন্দির্জ্যোতির্গণেশ্বরঃ ।
ৱিজিতাত্মাঽৱিধেযাত্মা সৎকীৰ্তিশ্ছিন্নসংশযঃ ॥ ৬৬॥

উদীৰ্ণঃ সৰ্ৱতশ্চক্ষুরনীশঃ শাশ্বতস্থিরঃ ।
ভূশযো ভূষণো ভূতিৰ্ৱিশোকঃ শোকনাশনঃ ॥ ৬৭॥

অৰ্চিষ্মানৰ্চিতঃ কুম্ভো ৱিশুদ্ধাত্মা ৱিশোধনঃ ।
অনিরুদ্ধোঽপ্ৰতিরথঃ প্ৰদ্যুম্নোঽমিতৱিক্ৰমঃ ॥ ৬৮॥

কালনেমিনিহা ৱীরঃ শৌরিঃ শূরজনেশ্বরঃ ।
ত্ৰিলোকাত্মা ত্ৰিলোকেশঃ কেশৱঃ কেশিহা হরিঃ ॥ ৬৯॥

কামদেৱঃ কামপালঃ কামী কান্তঃ কৃতাগমঃ ।
অনিৰ্দেশ্যৱপুৰ্ৱিষ্ণুৰ্ৱীরোঽনন্তো ধনঞ্জযঃ ॥ ৭০॥

ব্ৰহ্মণ্যো ব্ৰহ্মকৃদ্ ব্ৰহ্মা ব্ৰহ্ম ব্ৰহ্মৱিৱৰ্ধনঃ ।

ব্রহ্মৱিদ্ ব্রাহ্মণো ব্রহ্মী ব্রহ্মজ্ঞো ব্রাহ্মণপ্রিযঃ ॥ ৭১॥

মহাক্রমো মহাকর্মা মহাতেজা মহোরগঃ ।
মহাক্রতুর্মহাযজ্বা মহাযজ্ঞো মহাহৱিঃ ॥ ৭২॥

স্তৱ্যঃ স্তৱপ্রিযঃ স্তোত্রং স্তুতিঃ স্তোতা রণপ্রিযঃ ।
পূর্ণঃ পূরযিতা পুণ্যঃ পুণ্যকীর্তিরনামযঃ ॥ ৭৩॥

মনোজৱস্তীর্থকরো ৱসুরেতা ৱসুপ্রদঃ ।
ৱসুপ্রদো ৱাসুদেৱো ৱসুর্ৱসুমনা হৱিঃ ॥ ৭৪॥

সদ্গতিঃ সৎকৃতিঃ সত্তা সদ্ভূতিঃ সৎপরাযণঃ ।
শূরসেনো যদুশ্রেষ্ঠঃ সন্নিৱাসঃ সুযামুনঃ ॥ ৭৫॥

ভূতাৱাসো ৱাসুদেৱঃ সর্ৱাসুনিলযোঽনলঃ ।
দর্পহা দর্পদো দৃপ্তো দুর্ধরোঽথাপরাজিতঃ ॥ ৭৬॥

ৱিশ্বমূর্তির্মহামূর্তির্দীপ্তমূর্তিরমূর্তিমান্ ।
অনেকমূর্তিরৱ্যক্তঃ শতমূর্তিঃ শতাননঃ ॥ ৭৭॥

একো নৈকঃ সৱঃ কঃ কিং যৎ তৎপদমনুত্তমম্ ।
লোকবন্ধুর্লোকনাথো মাধৱো ভক্তৱৎসলঃ ॥ ৭৮॥

সুৱর্ণৱর্ণো হেমাঙ্গো ৱরাঙ্গশ্চন্দনাঙ্গদী ।
ৱীরহা ৱিষমঃ শূন্যো ঘৃতাশীরচলশ্চলঃ ॥ ৭৯॥

অমানী মানদো মান্যো লোকস্বামী ত্রিলোকধৃক্ ।
সুমেধা মেধজো ধন্যঃ সত্যমেধা ধরাধরঃ ॥ ৮০॥

তেজোৱৃষো দ্যুতিধরঃ সর্ৱশস্ত্রভৃতাং ৱরঃ ।

প্ৰগ্ৰহো নিগ্ৰহো ৱ্যগ্ৰো নৈকশৃঙ্গো গদাগ্ৰজঃ ॥ ৮১॥

চতুৰ্মূৰ্তিশ্চতুৰ্বাহুশ্চতুৰ্ব্যূহশ্চতুৰ্গতিঃ ।
চতুৰাত্মা চতুৰ্ভাৱশ্চতুৰ্ৱেদৱিদেকপাৎ ॥ ৮২॥

সমাৱৰ্তোঽনিৱৃত্তাত্মা দুৰ্জযো দুৰতিক্ৰমঃ ।
দুৰ্লভো দুৰ্গমো দুৰ্গো দুৰাৱাসো দুৰাৰিহা ॥ ৮৩॥

শুভাঙ্গো লোকসাৰঙ্গঃ সুতন্তুস্তন্তুৱৰ্ধনঃ ।
ইন্দ্ৰকৰ্মা মহাকৰ্মা কৃতকৰ্মা কৃতাগমঃ ॥ ৮৪॥

উদ্ভৱঃ সুন্দৰঃ সুন্দো ৰত্ননাভঃ সুলোচনঃ ।
অৰ্কো ৱাজসনঃ শৃঙ্গী জযন্তঃ সৰ্ৱৱিজ্জযী ॥ ৮৫॥

সুৱৰ্ণবিন্দুৰক্ষোভ্যঃ সৰ্ৱৱাগীশ্বৰেশ্বৰঃ ।
মহাহ্ৰদো মহাগৰ্তো মহাভূতো মহানিধিঃ ॥ ৮৬॥

কুমুদঃ কুন্দৰঃ কুন্দঃ পৰ্জন্যঃ পাৱনোঽনিলঃ ।
অমৃতাশোঽমৃতৱপুঃ সৰ্ৱজ্ঞঃ সৰ্ৱতোমুখঃ ॥ ৮৭॥

সুলভঃ সুৱ্ৰতঃ সিদ্ধঃ শত্ৰুজিচ্ছত্ৰুতাপনঃ ।
ন্যগ্ৰোধোঽদুম্বৰোঽশ্বত্থশ্চাণূৰান্ধ্ৰনিষূদনঃ ॥ ৮৮॥

সহস্ৰাৰ্চিঃ সপ্তজিহ্বঃ সপ্তৈধাঃ সপ্তৱাহনঃ ।
অমূৰ্তিৰনঘোঽচিন্ত্যো ভযকৃদ্ভযনাশনঃ ॥ ৮৯॥

অণুৰ্বৃহৎ কৃশঃ স্থূলো গুণভৃন্নিৰ্গুণো মহান্ ।
অধৃতঃ স্বধৃতঃ স্বাস্যঃ প্ৰাগ্বংশো ৱংশৱৰ্ধনঃ ॥ ৯০॥

ভাৰভৃৎ কথিতো যোগী যোগীশঃ সৰ্ৱকামদঃ ।

শ্রীৱিষ্ণুসহস্রনামস্তোত্রম্

আশ্রমঃ শ্রমণঃ ক্ষামঃ সুপর্ণো ৱাযুৱাহনঃ ॥ ৯১॥

ধনুর্ধরো ধনুর্ৱেদো দণ্ডো দমযিতা দমঃ ।
অপরাজিতঃ সর্ৱসহো নিযন্তাঽনিযমোঽযমঃ ॥ ৯২॥

সত্ত্ৱৱান্ সাত্ত্বিকঃ সত্যঃ সত্যধর্মপরাযণঃ ।
অভিপ্রাযঃ প্রিযার্হোঽর্হঃ প্রিযকৃৎ প্রীতিৱর্ধনঃ ॥ ৯৩॥

ৱিহাযসগতির্জ্যোতিঃ সুরুচির্হুতভুগ্ৱিভুঃ ।
রৱির্ৱিরোচনঃ সূর্যঃ সৱিতা রৱিলোচনঃ ॥ ৯৪॥

অনন্তো হুতভুগ্ভোক্তা সুখদো নৈকজোঽগ্রজঃ ।
অনির্ৱিণ্ণঃ সদামর্ষী লোকাধিষ্ঠানমদ্ভুতঃ ॥ ৯৫॥

সনাৎসনাতনতমঃ কপিলঃ কপিরৱ্যযঃ ।
স্ৱস্তিদঃ স্ৱস্তিকৃৎস্ৱস্তি স্ৱস্তিভুক্স্ৱস্তিদক্ষিণঃ ॥ ৯৬॥

অরৌদ্রঃ কুণ্ডলী চক্রী ৱিক্রম্যূর্জিতশাসনঃ ।
শব্দাতিগঃ শব্দসহঃ শিশিরঃ শর্ৱরীকরঃ ॥ ৯৭॥

অক্রূরঃ পেশলো দক্ষো দক্ষিণঃ ক্ষমিণাংৱরঃ ।
ৱিদ্ৱত্তমো ৱীতভযঃ পুণ্যশ্রৱণকীর্তনঃ ॥ ৯৮॥

উত্তারণো দুষ্কৃতিহা পুণ্যো দুঃস্ৱপ্ননাশনঃ ।
ৱীরহা রক্ষণঃ সন্তো জীৱনঃ পর্যৱস্থিতঃ ॥ ৯৯॥

অনন্তরূপোঽনন্তশ্রীর্জিতমন্যুর্ভযাপহঃ ।
চতুরশ্রো গভীরাত্মা ৱিদিশো ৱ্যাদিশো দিশঃ ॥ ১০০॥

অনাদির্ভূর্ভুৱো লক্ষ্মীঃ সুৱীরো রুচিরাঙ্গদঃ ।

জননো জনজন্মাদির্ভীমো ভীমপরাক্রমঃ ॥ ১০১॥

আধারনিলযোঽধাতা পুষ্পহাসঃ প্রজাগরঃ ।
ঊর্ধ্বগঃ সৎপথাচারঃ প্রাণদঃ প্রণৱঃ পণঃ ॥ ১০২॥

প্রমাণং প্রাণনিলযঃ প্রাণভৃৎপ্রাণজীৱনঃ ।
তত্ত্বং তত্ত্ববিদেকাত্মা জন্মমৃত্যুজরাতিগঃ ॥ ১০৩॥

ভূর্ভুৱঃস্বস্তরুস্তারঃ সৱিতা প্রপিতামহঃ ।
যজ্ঞো যজ্ঞপতির্যজ্বা যজ্ঞাঙ্গো যজ্ঞৱাহনঃ ॥ ১০৪॥

যজ্ঞভৃদ্ যজ্ঞকৃদ্ যজ্ঞী যজ্ঞভুগ্ যজ্ঞসাধনঃ ।
যজ্ঞান্তকৃদ্ যজ্ঞগুহ্যমন্নমন্নাদ এৱ চ ॥ ১০৫॥

আত্মযোনিঃ স্বযঞ্জাতো ৱৈখানঃ সামগাযনঃ ।
দেৱকীনন্দনঃ স্রষ্টা ক্ষিতীশঃ পাপনাশনঃ ॥ ১০৬॥

শঙ্খভৃন্নন্দকী চক্রী শার্ঙ্গধন্বা গদাধরঃ ।
রথাঙ্গপাণিরক্ষোভ্যঃ সর্ৱপ্রহরণাযুধঃ ॥ ১০৭॥

সর্ৱপ্রহরণাযুধ ওঁ নম ইতি ।
ৱনমালী গদী শার্ঙ্গী শঙ্খী চক্রী চ নন্দকী ।
শ্রীমান্ নারাযণো ৱিষ্ণুর্ৱাসুদেৱোঽভিরক্ষতু ॥ ১০৮॥

শ্রী ৱাসুদেৱোঽভিরক্ষতু ওঁ নম ইতি ।
উত্তরন্যাসঃ ।
ভীষ্ম উৱাচ ---
ইতীদং কীর্তনীযস্য কেশৱস্য মহাত্মনঃ ।
নাম্নাং সহস্রং দিৱ্যানামশেষেণ প্রকীর্তিতম্ ॥ ১॥

শ্ৰীৱিষ্ণুসহস্ৰনামস্তোত্ৰম্

য ইদং শৃণুযান্নিত্যং যশ্চাপি পরিকীর্তযেৎ ।
নাশুভং প্ৰাপ্নুযাৎকিঞ্চিৎসোঽমুত্ৰেহ চ মানৱঃ ॥ ২॥

ৱেদান্তগো ব্ৰাহ্মণঃ স্যাৎক্ষত্ৰিযো ৱিজযী ভৱেৎ ।
ৱৈশ্যো ধনসমৃদ্ধঃ স্যাচ্ছূদ্ৰঃ সুখমৱাপ্নুযাৎ ॥ ৩॥

ধৰ্মাৰ্থী প্ৰাপ্নুযাদ্ধৰ্মমৰ্থাৰ্থী চাৰ্থমাপ্নুযাৎ ।
কামানৱাপ্নুযাৎকামী প্ৰজাৰ্থী প্ৰাপ্নুযাৎপ্ৰজাম্ ॥ ৪॥

ভক্তিমান্ যঃ সদোত্থায শুচিস্তদ্গতমানসঃ ।
সহস্ৰং ৱাসুদেৱস্য নাম্নামেতৎপ্ৰকীর্তযেৎ ॥ ৫॥

যশঃ প্ৰাপ্নোতি ৱিপুলং জ্ঞাতিপ্ৰাধান্যমেৱ চ ।
অচলাং শ্ৰিযমাপ্নোতি শ্ৰেযঃ প্ৰাপ্নোত্যনুত্তমম্ ॥ ৬॥

ন ভযং ক্বচিদাপ্নোতি ৱীৰ্যং তেজশ্চ ৱিন্দতি ।
ভৱত্যরোগো দ্যুতিমান্বলরূপগুণান্বিতঃ ॥ ৭॥

রোগাৰ্তো মুচ্যতে রোগাদ্বদ্ধো মুচ্যেত বন্ধনাৎ ।
ভযান্মুচ্যেত ভীতস্তু মুচ্যেতাপন্ন আপদঃ ॥ ৮॥

দুৰ্গাণ্যতিতরত্যাশু পুরুষঃ পুরুষোত্তমম্ ।
স্তুৱন্নামসহস্ৰেণ নিত্যং ভক্তিসমন্বিতঃ ॥ ৯॥

ৱাসুদেৱাশ্ৰযো মৰ্ত্যো ৱাসুদেৱপরাযণঃ ।
সৰ্ৱপাপৱিশুদ্ধাত্মা যাতি ব্ৰহ্ম সনাতনম্ ॥ ১০॥

ন ৱাসুদেৱভক্তানামশুভং ৱিদ্যতে ক্বচিৎ ।
জন্মমৃত্যুজরাৱ্যাধিভযং নৈৱোপজাযতে ॥ ১১॥

শ্ৰীৱিষ্ণুসহস্ৰনামস্তোত্ৰম্

ইমং স্তৱমধীযানঃ শ্ৰদ্ধাভক্তিসমন্বিতঃ।
যুজ্যেতাত্মসুখক্ষান্তিশ্ৰীধৃতিস্মৃতিকীৰ্তিভিঃ ॥ ১২॥

ন ক্ৰোধো ন চ মাৎসৰ্যং ন লোভো নাশুভা মতিঃ।
ভৱন্তি কৃত পুণ্যানাং ভক্তানাং পুৰুষোত্তমে ॥ ১৩॥

দ্যৌঃ সচন্দ্ৰাৰ্কনক্ষত্ৰা খং দিশো ভূৰ্মহোদধিঃ।
ৱাসুদেৱস্য ৱীৰ্যেণ ৱিধৃতানি মহাত্মনঃ ॥ ১৪॥

সসুৰাসুৰগন্ধৰ্ৱং সযক্ষোৰগৰাক্ষসম্।
জগদ্বশে ৱৰ্ততেদং কৃষ্ণস্য সচৰাচৰম্ ॥ ১৫॥

ইন্দ্ৰিযাণি মনো বুদ্ধিঃ সত্ত্বং তেজো বলং ধৃতিঃ।
ৱাসুদেৱাত্মকান্যাহুঃ ক্ষেত্ৰং ক্ষেত্ৰজ্ঞ এৱ চ ॥ ১৬॥

সৰ্ৱাগমানামাচাৰঃ প্ৰথমং পৰিকল্পতে।
আচাৰপ্ৰভৱো ধৰ্মো ধৰ্মস্য প্ৰভুৰচ্যুতঃ ॥ ১৭॥

ঋষযঃ পিতৰো দেৱা মহাভূতানি ধাতৱঃ।
জঙ্গমাজঙ্গমং চেদং জগন্নাৰাযণোদ্ভৱম্ ॥ ১৮॥

যোগো জ্ঞানং তথা সাঙ্খ্যং ৱিদ্যাঃ শিল্পাদি কৰ্ম চ।
ৱেদাঃ শাস্ত্ৰাণি ৱিজ্ঞানমেতৎসৰ্ৱং জনাৰ্দনাৎ ॥ ১৯॥

একো ৱিষ্ণুৰ্মহদ্ভূতং পৃথগ্ভূতান্যনেকশঃ।
ত্ৰীংল্লোকান্ব্যাপ্য ভূতাত্মা ভুঙ্ক্তে ৱিশ্বভুগৱ্যযঃ ॥ ২০॥

ইমং স্তৱং ভগৱতো ৱিষ্ণোৰ্ৱ্যাসেন কীৰ্তিতম্।
পঠেদ্য ইচ্ছেৎপুৰুষঃ শ্ৰেযঃ প্ৰাপ্তুং সুখানি চ ॥ ২১॥

ৱিশ্বেশ্বরমজং দেৱং জগতঃ প্ৰভুমৱ্যযম্ ।
ভজন্তি যে পুষ্করাক্ষং ন তে যান্তি পরাভৱম্ ॥ ২২॥

ন তে যান্তি পরাভৱম্ ওঁ নম ইতি ।

অৰ্জুন উৱাচ ---

পদ্মপত্ৰৱিশালাক্ষ পদ্মনাভ সুরোত্তম ।
ভক্তানামনুরক্তানাং ত্ৰাতা ভৱ জনাৰ্দন ॥ ২৩॥

শ্ৰীভগৱানুৱাচ ---

যো মাং নামসহস্ৰেণ স্তোতুমিচ্ছতি পাণ্ডৱ ।
সোঽহমেকেন শ্লোকেন স্তুত এৱ ন সংশযঃ ॥ ২৪॥

স্তুত এৱ ন সংশয ওঁ নম ইতি ।

ৱ্যাস উৱাচ ---

ৱাসনাদ্বাসুদেৱস্য ৱাসিতং ভুৱনত্ৰযম্ ।
সৰ্ৱভূতনিৱাসোঽসি ৱাসুদেৱ নমোঽস্তু তে ॥ ২৫॥

শ্ৰী ৱাসুদেৱ নমোঽস্তুত ওঁ নম ইতি ।

পাৰ্ৱত্যুৱাচ ---

কেনোপাযেন লঘুনা ৱিষ্ণোৰ্নামসহস্ৰকম্ ।
পঠ্যতে পণ্ডিতৈৰ্নিত্যং শ্ৰোতুমিচ্ছাম্যহং প্ৰভো ॥ ২৬॥

ঈশ্বর উৱাচ ---

শ্ৰীরাম রাম রামেতি রমে রামে মনোরমে ।
সহস্ৰনাম তত্তুল্যং রাম নাম ৱরাননে ॥ ২৭॥

শ্ৰীরামনাম ৱরানন ওঁ নম ইতি ।

ব্ৰহ্মোৱাচ ---

নমোঽস্ত্বনন্তায সহস্ৰমূৰ্তযে
সহস্ৰপাদাক্ষিশিরোরুবাহৱে ।

শ্রীৱিষ্ণুসহস্রনামস্তোত্রম্

সহস্রনাম্নে পুরুষায শাশ্বতে
সহস্রকোটিযুগধারিণে নমঃ ॥ ২৮॥

সহস্রকোটিযুগধারিণে ওঁ নম ইতি ।

ওঁ তৎসদিতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতাযাং ৱৈযাসিক্যামানুশাসনিকে
পর্ৱণি ভীষ্মযুধিষ্ঠিরসংৱাদে শ্রীৱিষ্ণোর্দিৱ্যসহস্রনামস্তোত্রম্ ॥

সঞ্জয উৱাচ ---
যত্র যোগেশ্বরঃ কৃষ্ণো যত্র পার্থো ধনুর্ধরঃ ।
তত্র শ্রীর্ৱিজযো ভূতির্ধ্রুৱা নীতির্মতির্মম ॥ ২৯॥

শ্রীভগৱানুৱাচ ---
অনন্যাশ্চিন্তযন্তো মাং যে জনাঃ পর্যুপাসতে ।
তেষাং নিত্যাভিযুক্তানাং যোগক্ষেমং ৱহাম্যহম্ ॥ ৩০॥

পরিত্রাণায সাধূনাং ৱিনাশায চ দুষ্কৃতাম্ ।
ধর্মসংস্থাপনার্থায সম্ভৱামি যুগে যুগে ॥ ৩১॥

আর্তাঃ ৱিষণ্ণাঃ শিথিলাশ্চ ভীতাঃ ঘোরেষু চ ৱ্যাধিষু ৱর্তমানাঃ ।
সঙ্কীর্ত্য নারাযণশব্দমাত্রং ৱিমুক্তদুঃখাঃ সুখিনো ভৱন্তু ॥ ৩২॥

কাযেন ৱাচা মনসেন্দ্রিযৈর্ৱা বুদ্ধ্যাত্মনা ৱা প্রকৃতিস্বভাৱাৎ ।
করোমি যদ্যৎ সকলং পরস্মৈ নারাযণাযেতি সমর্পযামি ॥ ৩৩॥

ইতি শ্রীৱিষ্ণোর্দিৱ্যসহস্রনামস্তোত্রং সম্পূর্ণম্ ।

Please send corrections to- https://forms.gle/8g2Fvm143qWNbWzdA